Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५६४९ च

Title प्रत्यंगिरा विद्याया: पुरश्चरणम्

Author

Extent ६

Subject तन्त्रम्   संपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

5840
F — 7
1
Complete

नं० ५६४९-घ

प्रत्यंगिराविद्यायाः पुरश्चरणम् (त

पत्राणि ८ (सम्प्र)

नं० ११८९

© Dharmartha Trust J&K. Digitized by eGangotri

सं. ११८८-७६
प्रत्यङ्गि. वि.विद्याकः
पुरश्चरणम्
७ पत्राणि
सकाम्

नं० ५६६४-६-घ

प्रत्यंगिराविद्यायाः पुरश्चरणम् (तन्त्रम्)

पत्राणि ७ (सप्त)

श्री रणबीर पुस्तकालय
नं. ११८८

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰
ल॰
१

॥

ॐ श्रीगुरवे नमः अथ प्रत्यंगिरा सिद्धलक्ष्मी ॐ अस्य श्रीसिद्ध-
लक्ष्मीमंत्रस्य ब्रह्माऋषिः गायत्रीछंदः श्रीसिद्धलक्ष्मीर्देवता
क्लींबीजं ह्रूं शक्तिः क्रींकीलकं पूजने विनियोगः परमहंसिनि-
हृदयायनमः निर्वाणमार्गदेशि विषमोपप्लवप्रशमनि शि॰
सकलदुरितारिष्टक्लेशदलिनिक॰ सर्वापदंभोधितरणि नेत्र॰
सकलशत्रुप्रमथिनि अस्त्र॰ एवं ह्यंगुष्ठादिष्वपि विन्यस्य वक्त्रा-
न्यासं कुर्यात् ॐ नमः सर्वसिद्धिमातृयोगिनीभ्यः ऊर्ध्ववक्त्रा
यनमः ॐ नमः सर्वसिद्धिमातृभ्यः पूर्ववक्त्रायनमः ॐ नमोनि
त्योदितानंदनंदितायै दक्षिणवक्त्रायै नमः ॐ नमः सकलकुल
वक्त्रनायिकायै पश्चिमवक्त्रायनमः ॐ नमः भगवत्यै चंडकापा

© Dharmartha Trust J&K. Digitized by eGangotri

लिन्यै उत्तरवक्त्राय नमः इति वक्त्रेषु विन्यस्य ध्यायेत् देवींस्तु
द्धस्फटिकधवलां पंचवक्त्रां त्रिनेत्रां दोर्भिर्युक्तां दशाभिरमितः।
शोभितां रत्नहारैः कापालं खड्गंस्तणिममस्तणं शूलमच्छाक्षधारं सा
रात्सारं वरमनवरं दत्तहस्तैर्वहंतीं उत्खट्वांगं कठिनविकटं टंक
मूर्जस्विटंकं पाशं ज्ञानामृतरसमयं पुस्तकं चाभयं च कामं
वामैः स्तुभकरतलैर्विभ्रतीं विश्ववंद्यां पद्म प्रेतोपरिकृतप
दां सिंलक्ष्मीं नमामि खट्वांगकाद्यवरदाभयशूलटंकपाशांकु
शासिवरपुस्तकपद्महस्तां पंचाननां दशभुजां गिरिशाधिरूढां
तां ध्यायतोऽस्ति भुविकस्यनरस्य भीतिः इति ध्यात्वा ऊँ ह्रीं
श्रीं गणपतिनाथपादुकां पूजयामि नमः गणपतिवद्धमां

© Dharmartha Trust J&K. Digitized by eGangotri

वांपा· ॐह्रींश्रींवटुकनाथपा· वटुकवच्छ्रपांवापा· देहल्यंबा
पा· स्ववामदक्षिणेद्वारलक्ष्म्यंवापा· द्वाराधः ततोमंडूकादिस
दाशिवमहाप्रेतासनांतपीठंसंपूज्य देवीमावाह्य पंचोपचा
रैःसंपूज्य दिव्यौघेभ्यः गुरुभ्योनमः ॐपरमशिवानंदनाथपा·
परशक्त्यंवापा· सदाशिवनाथ· ईश्वरनाथ· श्रीकंठनाथ· पार्व
त्यंबा ब्रह्मनाथसिद्धौघेभ्यः गुरुभ्योनमः ॐवीरावलिनाथ·
रावणाश्रंधकमुनिनाथ· क्रोधमुनिना· नरनारायणाभ्यांन
मः वसिष्ठनाथ सिद्धादेवी दक्षिणे जयद्रथनाथ· दीपक
नाथ· सोमानंदनाथ· योगिनीयोगेशाभ्यांनमः योगानंद
ना· अनिरुद्धानाथ· सुभगानंदना· सुनाभिविपुलावलि।

© Dharmartha Trust J&K. Digitized by eGangotri

पादाभ्यां नमः तेजस्वीश्वरना॰ भोगानंदनाथ॰ उद्योगानंदना॰
अमलानंदनाथ॰ तरलानंदनाथ॰ मानवौघेभ्यः गुरुभ्यो नमः
ॐ जयद्रथानंदनाथ॰ दीपकानंद॰ चर्यानंद॰ सुरानंद॰ गगनानं
द॰ भूतिनाथ॰ इंद्रभूतिना॰ भास्करनाथ॰ पद्मादेवी अंबाया सह-
जस्वामि॰ मलयस्वामिना॰ हालाहलस्वामि॰ रौरवस्वामि॰ शंकर
स्वामि॰ चतुष्कलस्वामि॰ मलयस्वामि॰ ततो मूलेन देवीपूजनम्
ॐ नमः सर्वसिद्धियोगिनीभ्यः ॐ नमः सर्वसिद्धिमातृभ्य ॐ नमो
नित्योदितानंदनंदितायै सकलकुलचक्रनायिकायै भगवत्यै चं
डिकापालिन्यै नमः ॐ ह्रीं हूं फां फें च्छौं क्रौं नमः ॐ परमहंसिनि नि
र्वाणमार्गदे विषमोपप्लवप्रशमनि सकलदुरितारिष्टक्लेशदल

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰
ल॰
३

नि सर्वापदम्भोधितारिणि सकलशत्रुप्रमथि देवि आगच्छ २ हस २ वल्ग २ नररुधिरान्त्रवसाभक्षिणि मम सर्वशत्रून्मर्दय २ खाहि २ त्रिशूलेन भिंदि २ छिंदि २ खड्गेन ताडय २ छेदय २ तावद्यावन्मम सकलमनोरथान्साधय २ परमकारुणिके भगवति महाभैरवरूपधारिणी त्रिदशवरनमिते सकलमंत्रमातः प्रणतजनवत्सले देवि महाकालि कालनाशिनि ह्रूं ह्रूं ह्रूं प्रसीद मदन्तराङ्कुरु २ सुरासुरकन्यकां ह्रीं श्रीं फ्रें फ्रें ह्रूं फट् २ स्वाहा इति मूलं वर्णाः २९॰ पूर्वोक्तवक्त्राङ्गैः स्वस्वस्थानेषु संपूज्य पुनः आगच्छ २ इत्यावाह्य हस २ इति सन्निधाप्य वल्ग २ इति निरोध्य आयुधान्यर्चयेत् नररुधिरान्त्रवसाभक्षिणिपात्राय नमः मम सर्वशत्रून्मर्दय २ खाहि २

खट्वांगाय त्रिशूलेनभिंदि २ त्रिशूलाय खड्गेनच्छिंधि खड्गायता
डय २ छेदय २ मुद्गरायनमः तावद्यावन्ममसकलमनोरथान्
साधय २ पुस्तकाय परमकारुणिके भगवति महाभैरवरूपधा
रिणि पाशाय त्रिदशावरनमिते अंकुशाय सकलमन्त्रमातः वराय
प्रणतजनवत्सले अभयाय देवि महाकालिकालनाशिनि महा
प्रेतासयनायनमः इत्यासनं संपूज्य ह्रुं ह्रुं ह्रुं प्रसीद मदनातुरां कु
रु २ सुरासुरकन्यकां इतिपुर्यष्टकव्यात्याचर्येयेत् ॐकारेण-
सर्वं देहं स्पृशेत् ॐ क्रीं गुह्ये ॐ श्रीं लिंगे ॐ क्रें हृदये ॐ ह्लं ग्रास्ये ।
फट् फट् ॐ ष्ट स्फुट हृदये फट् नासापुट हृदये फट् नेत्र हृदये फट् स्वा
हाकर हृदये पुनः सिद्धाष्टकमष्टदले सपत्नीकम् ॐ डामरीनाथ·

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·
ल·
४
५

ब्रह्मण्यंबापा· रक्तडामरीना· माहेश्वर्यम्बापा· कुलेशडामरीना
थ· कौमार्यम्बा· उन्मत्तडामरीना· वैष्णव्यंबा· करंकवीरडामरी-
नाथ· महालक्ष्म्यंबा· इतिसिद्धमातरः कुत्रापिसिद्धमातृणां विभे
दोयथा सौम्यायै ॐसौर्यै ॐवायव्यै ॐनारसिंह्यै जलेश्वर्यै याम्यै
वैनायिकौ ॐब्राह्म्यै षोडशदले दत्तनाथपा· चंडनाथ· हरितना·
शौंडनाथ प्रमथना· भीमना· मन्मथना· शकुनिना· सुमतिना· नंद
गोपालनाथ· पितामहना· भीमराजना· महाबलना· इतिसिद्धा।
अथोत्कीलनविद्या क्लींक्लुंक्लैंमहाचंडयोगेश्वरिध्रींफट् ५ वर्णाः ७८
षाविद्याराजतंत्रे सप्तादशाक्षरी कीलिता यदाह तत्रपूर्वमेवमयादे
वि सर्वपत्रे नियामिताः रावणाधकासिद्धेशाङ्कुष्ठाशया विधायिनः तद

© Dharmartha Trust J&K. Digitized by eGangotri

र्थं तु वरारोहे राजतंत्रं तु कीलितं क्रोधमस्य त्वया सार्धं रहस्यं प्रकटीकृ
तं क्रमेण सर्वविद्यानां कृत्मुत्कीलमं मया आदिमेन विहीना सा सार्ध
पंचविवर्जिता षष्टाष्टकविहीना च विद्या सप्तादशाक्षरी तथात्र मंत्रव्य
वहारः ह्स्फ्रें महाचंडयोगेश्वरि धीं एषैव प्रतिवर्णभेदिता देवता सप्त
दशकस्य वीजत्वे देया यथा ॐ ह्स्फ्रें क्ष्रीं महाहेश्वर्यै वा पा॰ ॐ क्ष्रीं क्रां क्र
ररक्तकारिण्यै वा पा॰ ॐ क्ष्रीं चं चंडिकां वा पा॰ ॐ क्ष्रीं नं नंदां वा पा॰ ॐ क्ष्रीं
उं डामर्यै वा पा॰ ॐ क्ष्रीं यं यमघंटां वा पा॰ ॐ क्ष्रीं ॐ गजवक्त्रां वा पा॰ ॐ
क्ष्रीं गं गनेश्वर्यै वा पा॰ ॐ क्ष्रीं एकवीरां वा पा॰ ॐ क्ष्रीं ऐं शं शवर्यां वा पा॰ –
ॐ क्ष्रीं एकवीरां वा पा॰ ॐ क्ष्रीं ऐं शं वर्यां वा पा॰ ॐ क्ष्रीं वं वरदां वा पा॰ ॐ
क्ष्रीं र र क्तां वा पा॰ ॐ क्ष्रीं इं इंदीवर्यां वा पा॰ ॐ क्ष्रीं धं धनां वा पा॰ ॐ क्ष्रीं रं रम

© Dharmartha Trust J&K. Digitized by eGangotri

एपं वाया· ॐ क्लीं ईं ईं शान्यं वाया· ॐ क्लीं मं मंत्र मातां वाया· इत्युत्कील
न देवता विविधं नैवेद्यं निवेद्य ह्रेत्रेशान्संपूज्य संतर्प्य न्यासं कुर्यात्
श्री देव्युवाच परमेश सुधासूति कलालंकृत शेखर वद प्रत्यंगिरा दे
वीं त्रैलोक्य भयनाशिनीं वक्र मंत्राभिचाराणि यां नाशयति लीलया·
शान्तिपुष्टिकरी क्षुद्राग्रहापस्मारमर्दिणी भूतवेतालशमनी कृत्या
खार्खोदनाशिनी सर्वसाधारणी घोरा सर्वोपद्रवनाशिनी सर्वसंप
त्प्रदा श्रेष्ठा सर्वसंपत्प्रदायिनी अस्यां विज्ञातमात्रायां विभूतिः संप्र
वर्तते अस्या घोरतरा नान्या विद्यते भुवनोदरे नामाख्याहि महादे
व प्रसादाद्धि क्षुनायक । श्री ईश्वर उवाच उद्धृता परमा विद्या सुख
सौभाग्य मोक्षदा शतद्वयं तु वर्णानां नवत्यधिक मुद्धृतं एषावि-

© Dharmartha Trust J&K. Digitized by eGangotri

द्या महाविद्या नाम्ना त्रैलोक्य मोहिनी लक्ष्मीश्वरीति विख्याता बहु
भोगवरा महा महालक्ष्मीर्महाकांता सर्वसौभाग्यदा स्मृता अस्मि
न्स्तोत्रस्य देवेशि नानया सदृशी परा अलक्ष्मी शमनी ज्ञेया दुष्टदारि
द्र्य मर्दिनी कलिःदुस्वप्न शमनी इत्योपद्रव नाशिनी सदारण्यभ
ये घोरे सिंहव्याघ्रादि संकटे विषमे गहने वह्नौ भूतापस्मार जेभ
ये स्मरणीया सदा गौरि कृत्या संक्रमणे भये सकृत्स्मृत्वा दहत्ये
षा पापौघं तृणराशिवत् हत्वा जगदिदं सर्वं ब्रह्मविद्भिः प्रपूरि
तं गुरुहा पितृहा देवि मातृहा भ्रूणहा तथा लिंगोत्पाटादि पापे
भ्यः सकृत्पाठात्प्रमोचयेत् पापैर्महापातकैश्च तथा चैवोपपात
कैः तथा पातेकराजैश्च सकृन्मोचयते स्मृता लक्ष्मीयुक्तो भवेच्छ्री

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰
ल॰
६

मान्सर्वोत्तमोत्तमाम् सप्तसागरपर्यंतं तीर्थस्नानं कृतं भवेत् त्रिरा
वर्त्यसुरेशानि दिव्यभौमोत्तरिक्षजैः तीर्थैः स्नातो भवेद्देवि नात्र कार्या
विचारणा सप्तावर्तीत् सुरेशानि दीक्षितः सर्वमंडले दशावर्तेन सु
भगे पुत्रको भवते सदा सप्तविंशतिजाप्येन जायते मातृमंडले।
साधको वीरराजेशो यथा भैरवनायकः शताष्टोत्तरजाप्येन भवे
द्भैरववत्स्वयं तन्नास्ति यत्र कुरुते नास्ति तपन्न साधयेत् निगडा
शनिपञ्जाणि नाशयेल्लीलया सदा त्रिसंध्यावर्तनाद्देवि सप्ताहा-
न्नात्र संशयः बंधनान्मुच्यते जंतुर्यदि कालेन भावितः धनधा-
न्यांतरा भूमिः साधकस्य सदा भवेत् यथा नारायणो देवो लक्ष्मी
कांतः सदास्थितः तथा साधकराजश्च स्मरणान्नित्यमेव हि॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धरमायै विद्महे प्रत्यंगिरायै धीमहि तन्नः परा प्रचोदयात् ॥

अयुतजपोस्याः पुरश्चरणम् प्रत्यंगिराविद्यायाः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

प्र॰ लं॰ ७

~~१४६~~
१४२

नं० ५६४६-घ
प्रत्यंगिराविद्यायाःपुरश्चरणम् (तन्त्रम्)
पत्राणि ७ (सप्त) (सम्पूर्णम्)

© Dharmartha Trust J&K. Digitized by eGangotri